अस्मिन् प्रश्नपत्रे **51** प्रश्नाः एवम् **8** मुद्रित पृष्ठाः सन्ति।

**अनुक्रमाङ्कः** | | | | | | | | | | | | |

**गूढसंख्या 71/S/247/A**

**स्तवकः A**

# BHARATIYA DARSHAN
# भारतीयदर्शनम्
# (247-S)

**परीक्षादिवसः दिनाङ्कश्च** ____________________

**निरीक्षकयोः हस्ताक्षरम्** 1. ____________________

2. ____________________

**सामान्या निर्देशाः –**

1. सर्वेषां प्रश्नानामुत्तराणि दत्तोत्तरपुस्तके एव लिखन्तु।
2. प्रश्नपत्रिकां पठितुं **15** निमेशाः दत्ताः। प्रश्नपत्रिका **02.15** मध्यह्ने समये दीयते। **02.15** समयतः **02.30** समयपर्यन्तं प्रश्नपत्रिकामेव छात्राः पठेयुः, एतस्मिन् समये उत्तरपत्रिकायां न किमपि उत्तरं लिखेयुः।
3. अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे नूनं लेख्यः।
4. निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।
5. वस्तुनिष्ठप्रश्नानाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम्।
6. समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।
7. उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।
8. स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या **71/S/247/A**, स्तबक-**A** नूनं लेख्या।



**UNNATI EDUCATION**
**9899436384: 9654-279-279**

# BHARATIYA DARSHAN

# भारतीयदर्शनम्

# (247-S)

**परीक्षासमयावधि : होरात्रयम् ]** **पूर्णाङ्काः : – 100**

---

**निर्देशाः** **(i)** अस्मिन् प्रश्नपत्रे [A] भागे 20, [B] भागे 15, [C] भागे 6, [D] भागे 6, [E] भागे 4 इति आहत्य 51 प्रश्नाः सन्ति।

**(ii)** **सर्वे** प्रश्नाः **अनिवार्याः**।

**(iii)** प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति।

**(iv)** [A] भागे प्र.सं. 1 तः 20 पर्यन्तं वस्तुनिष्ठ/बहुविकल्पप्रकारस्य प्रश्नाः (MCQs) येषु प्रत्येकं एकः अङ्कः भवति। एतेषु प्रत्येकस्मिन् प्रश्ने दत्तचतुर्णां विकल्पानां मध्ये सर्वाधिकम् उपयुक्तं विकल्पं चित्वा लिखन्तु।

**(v)** [B] भागे प्र.सं. 21 तः 35 पर्यन्तं वस्तुनिष्ठप्रश्नाः/मेलनम्, रिक्तस्थानानि, सत्यम्–असत्यम् इत्यादीनि। प्रत्येकं प्रश्नः अङ्कद्वयात्मकः अस्ति। ते यथानिर्देशं समाधेयाः।

**(vi)** [C] भागे प्र.सं. 36 तः 41 पर्यन्तं अतिलघूत्तरीयाः प्रश्नाः प्रत्येकं अङ्कद्वयात्मकाः सन्ति। ते यथानिर्देशं 30 तः 50 शब्दानां परिधिमध्ये समाधेयाः।

**(vii)** [D] भागे प्र.सं. 42 तः 47 पर्यन्तं अनतिदीर्घोत्तरीयाः प्रश्नाः प्रत्येकं अङ्कत्रयात्मकाः सन्ति। ते यथानिर्देशं 50 तः 80 शब्दानां परिधिमध्ये समाधेयाः।

**(viii)** [E] भागे प्र.सं. 48 तः 51 पर्यन्तं दीर्घोत्तरीयः प्रश्नाः प्रत्येकं पञ्चाङ्कात्मकाः सन्ति। ते यथानिर्देशं 80 तः 100 शब्दानां परिधिमध्ये समाधेयाः।

**(ix)** स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूनं लेखनीया।

**(x)** उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् तथा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।

**(xi)** समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेखनीयानि।

**(xii)** निरीक्ष्यतां यत् प्रश्नपत्रस्य पुटसंख्या प्रश्नानां च संख्या प्रथमपुटस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।

**(xiii)** अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपुटे नूनं लेखनीयः।



UNNATI EDUCATION
9899436384: 9654-279-279

**[A]** प्रश्नसंख्या **1-20** बहुविकल्पप्रश्नाः सन्ति येषां कृते **20** अङ्काः आवण्टिताः भवन्ति। **1×20=20**

**1** कर्मस्वरूपमात्रबोधको विधिः कः ?

(क) उत्पत्तिविधिः (ख) विनियोगविधिः

(ग) अधिकारविधिः (घ) प्रयोगविधिः

**2** वेदशब्दः कस्मात् धातोः निष्पन्नः ?

(क) विद ज्ञाने (ख) विद विचारणे

(ग) विद सत्तायाम् (घ) विद लाभे

**3** भारतीयसंस्कृतौ कति पुरुषार्थाः ?

(क) द्वौ (ख) त्रयः

(ग) चत्वारः (घ) षट्

**4** 'शब्दभावना विधिः' – इति कस्य मतम् ?

(क) कुमारिलभट्टस्य (ख) प्रभाकरस्य

(ग) जैमिनेः (घ) मुरारिमिश्रस्य

**5** पुराणं कतिलक्षणात्मकम् ?

(क) चतुर्लक्षणम् (ख) पञ्चलक्षणम्

(ग) षल्लक्षणम् (घ) सप्तलक्षणम्

**6** किम् धर्ममूलम् मनुराह ?

(क) वेदः (ख) न्यायः

(ग) काव्यम् (घ) युक्तिः

**7** 'अथातो ब्रह्मजिज्ञासा' – इति सूत्रं केन प्रणीतम् ?

(क) जैमिनिः (ख) बादरायणः

(ग) गौतमः (घ) पाणिनिः

**8** अथर्ववेदस्य उपवेदः कः ?

(क) आयुर्वेदः (ख) गान्धर्ववेदः

(ग) अर्थशास्त्रम् (घ) धनुर्वेदः



**UNNATI EDUCATION**
**9899436384: 9654-279-279**

9 विज्ञानवादिनः के ?

(क) माध्यमिकाः (ख) योगाचाराः

(ग) सौत्रान्तिकाः (घ) वैभाषिकाः

10 महावीरः कतमः तीर्थङ्करः ?

(क) प्रथमः (ख) षष्ठः

(ग) दशमः (घ) चतुर्विंशतिः

11 अनेकान्तवादः इति ग्रन्थः केन रचितः ?

(क) सिद्धसेनः (ख) हरिभद्रसूरिः

(ग) समन्तभद्रः (घ) उमास्वामी

12 सांख्यसूत्राणां कः रचयिता ?

(क) जैमिनिः (ख) कपिलः

(ग) बादरायणः (घ) पाणिनिः

13 ब्रह्मसूत्रस्य उपरि शुद्धाद्वैतसम्प्रदायसम्मतं भाष्यं केन च रचितम् ?

(क) श्रीकण्ठेन (ख) भास्करेण

(ग) बलदेवेन (घ) वल्लभाचार्येण

14 शौचं कतिविधम् ?

(क) चतुर्विधम् (ख) त्रिविधम्

(ग) द्विविधम् (घ) अष्टविधम्

15 अद्वैतवेदान्ते कति प्रमाणानि अङ्गीकृतानि ?

(क) चत्वारि (ख) पञ्च

(ग) षट् (घ) सप्त

16 संघातपरार्थत्वात् किं सिध्यति ?

(क) प्रकृतिः (ख) पुरुषः

(ग) महत्तत्त्वम् (घ) अहङ्कारः



UNNATI EDUCATION
9899436384: 9654-279-279

17 महत्तत्त्वात् किमुत्पद्यते ?

(क) प्रकृतिः (ख) पञ्चप्राणाः

(ग) पञ्चतन्मात्राणि (घ) अहङ्कारः

18 योगदर्शने कति तत्त्वानि अङ्गीकृतानि ?

(क) चतुर्विंशतिः (ख) पञ्चविंशतिः

(ग) षड्विंशतिः (घ) विंशतिः

19 अद्वैतवेदान्तदिशा अभावस्य प्रत्यक्षत्वं केन सिध्यति ?

(क) प्रत्यक्षप्रमाणेन (ख) शब्दप्रमाणेन

(ग) अनुपलब्धिप्रमाणेन (घ) अर्थापत्तिप्रमाणेन

20 अद्वैतवेदान्तमते कस्य ब्रह्मविद्यायाम् अधिकारः ?

(क) वेदज्ञानिनः (ख) साधनचतुष्टयसम्पन्नस्य

(ग) शास्त्रज्ञानिनः (घ) पण्डितस्य

[B] प्रश्नसंख्या **21-35** वस्तुनिष्ठप्रश्नाः सन्ति। प्रत्येकं प्रश्नं द्वयोः अङ्कयोः भवति, तदर्थं **30** अङ्काः आवण्टिताः भवन्ति। **2×15=30**

21 अधोलिखितयोः रिक्तस्थानयोः उत्तरं ददातु। **2**

(क) सांख्यमते प्रकृतिः ________ चेति नित्यं तत्त्वद्वयम्।

(ख) क्षिप्तं, मूढं, विक्षिप्तं ________ निरुद्धं चेति चित्तभूमयः।

22 अधोलिखितयोः रिक्तस्थानयोः उत्तरं ददातु। **2**

(क) परमगुरौ ईश्वरे सर्वेषां कर्मणां समर्पणं हि ________ ।

(ख) शङ्कराचार्यस्य परमगुरुवः हि ________ ।

23 अधोलिखितयोः रिक्तस्थानयोः उत्तरं ददातु। **2**

(क) 'तमेव विदित्वा अतिमृत्युमेति नान्यः ________ विद्यते अयनाय।'

(ख) 'अस्ति भाति प्रियं ________ नाम चेत्यंशपश्चकम्।'

24 अधोलिखितयोः रिक्तस्थानयोः उत्तरं ददातु। **2**

(क) अद्वैतवेदान्तमते अज्ञानस्य भावरूपत्वे ________ इति अनुभवः प्रमाणम्।

(ख) ज्ञानेन्द्रियपञ्चकसहिता बुद्धिः ________ –कोशो भवति।



UNNATI EDUCATION
9899436384: 9654-279-279

25 अधोलिखितेषु रिक्तस्थानेषु उत्तरं ददातु। 2

(क) 'न निरोधो न ________ न बद्धो न च साधकः'।

(ख) प्राज्ञस्तत्राभिमानेन ________ प्रपद्यते।

26 अधोलिखितयोः वाक्ययोः सत्यम् असत्यं च वाक्यं चिनोतु। 2

(क) बौद्धदर्शनम् एकम् आस्तिकं दर्शनम्। सत्यम्/असत्यम्

(ख) जैनदर्शनमते आत्मा परिणामी द्रव्यम् अस्ति। सत्यम्/असत्यम्

27 अधोलिखितयोः वाक्ययोः सत्यम् असत्यं च वाक्यं चिनोतु। 2

(क) योगदर्शने ईश्वरः न स्वीक्रियते। सत्यम्/असत्यम्

(ख) अद्वैतवेदान्ते षट् प्रमाणानि स्वीक्रियन्ते। सत्यम्/असत्यम्

28 अधोलिखितयोः वाक्ययोः सत्यम् असत्यं च वाक्यं चिनोतु। 2

(क) अद्वैतवेदान्तमते अज्ञानं न सत्, नापि असत्। सत्यम्/असत्यम्

(ख) संक्षेपशारीरककारमते अविद्यायां चित्प्रतिबिम्बः जीवः। सत्यम्/असत्यम्

29 अधोलिखितयोः वाक्ययोः सत्यम् असत्यं च वाक्यं चिनोतु। 2

(क) भाट्टमीमांसकाः अज्ञानोपहितं चैतन्यम् आत्मा इति वदन्ति। सत्यम्/असत्यम्

(ख) अद्वैतवेदान्तमते साधनचतुष्टयसम्पन्नस्य एव वेदान्तशास्त्रे अधिकारः। सत्यम्/असत्यम्

30 अधोलिखितयोः वाक्ययोः सत्यम् असत्यं च वाक्यं चिनोतु। 2

(क) येषां कर्मणां स्वर्गादि इष्टं फलं तानि निमित्तानि। सत्यम्/असत्यम्

(ख) मनसो निग्रहः हि दमः। सत्यम्/असत्यम्

31 मेलनं कुरु – 2

| | | | |
|---|---|---|---|
| (क) | कर्मचोदना ब्राह्मणानि | 1. | सायणः |
| (ख) | शेषे ब्राह्मणशब्दः | 2. | जैमिनिः |
| | | 3. | आपस्तम्बः |

32 मेलनं कुरु – 2

| | | | |
|---|---|---|---|
| (क) | सत्त्वम् | 1. | आवरणकम् |
| (ख) | तमः | 2. | प्रकाशकम् |
| | | 3. | चलम् |



UNNATI EDUCATION
9899436384: 9654-279-279

**33** मेलनं कुरु – **2**

| | |
|---|---|
| (क) रामानुजः | 1. पूर्णप्रज्ञभाष्यम् |
| (ख) मध्वाचार्यः | 2. श्रीभाष्यम् |
| | 3. अणुभाष्यम् |

**34** मेलनं कुरु – **2**

| | |
|---|---|
| (क) माया | 1. शुद्धसत्त्वप्रधानम् अज्ञानम् |
| (ख) अविद्या | 2. शुद्धतमःप्रधानम् अज्ञानम् |
| | 3. मलिनसत्त्वप्रधानम् अज्ञानम् |

**35** मेलनं कुरु – **2**

| | |
|---|---|
| (क) स्मरणात्मिका अन्तःकरणवृत्तिः | 1. बुद्धिः |
| (ख) अभिमानात्मिका अन्तःकरणवृत्तिः | 2. चित्तम् |
| | 3. अहङ्कारः |

**[C]** षट्–प्रश्नानां यथानिर्देशम् लघूनि उत्तराणि लिखत। **2×6=12**

**36** यास्ककृते निरुक्ते कति काण्डानि सन्ति? कानि च तानि?

**अथवा**

वेदान्ते प्रस्थानं नाम किम्? कानि प्रस्थानानि?

**37** गौतमबुद्धस्य जन्मस्थानं कुत्र? तस्य पितरौ कौ?

**38** शून्यवादिनां मते शून्यस्य स्वरूपम् किम्?

**अथवा**

जैनमते को नाम बन्धः?

**39** अध्यारोपलक्षणं किम्?

**40** सांख्यमते का नाम प्रकृतिः? किमर्थं प्रकृतिः प्रत्यक्षेण न गृह्यते?

**अथवा**

विशिष्टाद्वैतदर्शने त्रितयं सत्यं किम्?

**41** वेदान्तशास्त्रं किमर्थं प्रवृत्तम्?



UNNATI EDUCATION
9899436384: 9654-279-279

[D] षट्–प्रश्नान् अनतिदीर्घोत्तरैः समाधत्त। 3×6=18

42 विधिभेदान् परिचाययत।

**अथवा**

केनोपनिषदः समासेन परिचयः दीयताम्।

43 वेदान्तानुसारेण सूक्ष्मभूतात् स्थूलभूतोत्पत्तेः प्रक्रियां वर्णयत।

44 अष्टाङ्गिकमार्गस्य परिचयं कारयत।

**अथवा**

जैनदर्शने अजीवतत्त्वविषये लघुटिप्पणीं लिखत।

45 अनेकजीववादस्य मूलवैशिष्ट्यानि लिखत।

46 सांख्यदर्शनानुसारेण प्रकृतेः स्वरूपं समासेन लिखत।

**अथवा**

अद्वैतवेदान्तानुसारेण मायास्वरूपं समासेन लिखत।

47 कर्मयोगविषये लघुटिप्पणीं लिखत।

[E] चत्वारः दीर्घोत्तरैः समाधेयाः। 5×4=20

48 मीमांसायाः समासेन परिचयः दीयताम्।

**अथवा**

समासेन ब्रह्मसूत्रस्य अध्यायानां परिचयः दीयताम्।

49 योगस्य अष्टाङ्गेषु यथेच्छम् अङ्गचतुष्टयं समासेन आलोच्यताम्।

50 अद्वैतवेदान्तानुसारेण अवच्छेदवादं विवृणुत।

**अथवा**

षड्विधतात्पर्यनिर्णायकलिङ्गानां परिचयः सोदाहरणं देयः।

51 शुद्धाद्वैतवेदान्तानुसारेण ब्रह्मस्वरूपं समासेन प्रतिपादयत।

---



UNNATI EDUCATION
9899436384: 9654-279-279